CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

॥श्रीगणेशांबिकाभ्यांनमः गणेशं गिरिजां नत्वा गुरुं हरिहरौ तथा करोमि
बालबोधार्थं पद्धतिं दशकर्मणां १ तत्र प्रथमं सकलकर्मोपयोगिनी कुश
कंडिका प्रोच्यते स्थंडिले पंचभूसंस्कारान् विप्रैः कुर्यात् दर्भैः परिसमु
ह्य ३ गोमयेनोपलिप्य २ स्रुवेणोल्लिख्य २ अनामिकांगुष्ठेनोद्धृत्य २ उद
केनाभ्युक्ष्य २ अग्निमुपसमाधाय दक्षिणतो ब्रह्मासनं उत्तरतः प्रणीता
सनं तत्र ब्रह्मोपवेशनं कुशपंचाशको ब्रह्मा यावत्कर्म समाप्यते तावत्त्वं ब्र
ह्मा भव भवामि इति निवेदेत् ब्रह्मानुज्ञातः प्रणीताप्रणयनं ईशानादि पूर्वा
ग्रैर्दर्भैः एकमुष्ट्या परिस्तरणं पात्रासादनं पवित्रच्छेदनानि त्रीणि तृ
णानि पवित्रे द्वे प्रोक्षणीपात्रं आज्यस्थाली चरुस्थाली संमार्गकुशाः १

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ध्रुवस्रुत्सवनं आज्यावेक्षणं अपद्रव्यनिरसनं अभिघार्य चरोरुद्वासनं उ
द्वासितस्याऽज्यस्य पश्चात् अभिघारणं शिष्टसंप्रदायगौरवात् श्रौतादि
देशात् उपयमनकुशग्रहणं वामे करे नलिप्तं त्रिस्त्रः समिध अग्नौ आ
धाय प्रोक्षणीशेषोदकेन सपवित्रहस्तेन पर्युक्षणं कुर्यात् पवित्रयोः प्रणी
तागमनं दक्षिणं जान्वाच्य ब्रह्मान्वारब्धे स्रुवेण होमः आधारावाज्यभागौ
महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यं स्विष्टकृच्चैतं नित्यं सर्वत्र एताश्च
तुर्दशाऽज्याहुतयः सर्वत्र ब्रह्मान्वारब्धे सति होतव्याः आघारावाज्यभागौ
यथा प्रजापतये स्वाहा इदं प्राजापतये न मम इंद्राय स्वाहा इदमिंद्राय २
अग्नये स्वाहा इदमग्नये सोमाय स्वाहा इदं सोमाय यदा चरुहविर्दा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

२

समिधस्तिस्रः प्रादेशमात्राः स्रुवः स्रुचिः ऽप्राज्यं तंडुलाः पूर्णपात्रंच १

स्तिस्रः उपयमनकुशाः पंच ॐ त्रिभिस्तृणैर्हि छित्वा तेद्वे पवित्रेग्राह्ये ततः प्र
णीतोदकात्प्रोक्षिण्याभिः पूरणं पवित्राभ्यांप्रोक्षिण्याः उत्पवने सव्यह
स्तेकृत्वा दक्षिणेनाछादयेत् ताभिरद्भिस्तासांप्रोक्षणं ततोयथासादित
पात्राणांप्रोक्षणंकृत्वाप्रणीताग्न्योर्मध्ये संचरेप्रोक्षणीर्निधाय आज्यस्था
ल्यामाज्यनिर्वापः चरुस्थाल्यांतंडुलनिर्वापः तंडुलांस्त्रिप्रक्षाल्य प्रणीतो
दकमासिंच्य अग्नेर्दक्षिणतः आज्याधिश्रयणं मध्येचरोरधिश्रयणं
उभयोः पर्यग्निकरणं शृतेचरौस्रुवः प्रतपनं संमार्गकुशैः संमार्ज्जनं अ
ग्रेअग्रंमूलेमूलं प्रणीतोदकेनाभ्युक्षणं पुनः प्रतप्यप्रभोनिदध्यात्
आज्यमुद्वासयेत् शृतस्यचरोः पूर्वेण ततः पवित्राभ्यामुत्पूयप्रोक्षिण्यो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तः स्वर्क्केः स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्के
भ्यः उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमं ८ श्रथाय अथवयमादि
त्यव्रते तवानागसो आदितये स्याम स्वाहा इदं वरुणायाऽदित्यायादितये प्र
जापतये स्वाहा इदं प्रजापतये ९ आज्यमेव हविः सर्वत्र अत्र स्विष्टकृदाज्ये
न संस्रवप्राशनं पवित्राभ्यां मार्जनं पवित्रप्रतिपत्तिः वह्नौ प्रक्षेपः प्रणीतावि
मोकः ब्रह्मणे पूर्णपात्रं इति कुशकंडिका होममात्रे सर्वत्र कर्त्तव्या जात
कर्मणि न कर्त्तव्या॥ ७ ॥ प्रथमं विवाहकर्म लिख्यते तत्र कन्यायाः पिता
कृतमंगलस्नानः मातृकापूजनं नांदीश्राद्धं कृत्वा गृहयज्ञं मंडपप्रतिष्ठा
पनं स्तंभरोपणं च विवाहात्प्रथमदिने विवाहदिने वा कुर्यात् समाचारा २

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ऽअस्यसेचरोः स्विष्टकृद्धोमः अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृ
ते अथ भूराद्या नवाहुतयः भूः स्वाहा इदमग्नये भुवः स्वाहा इदं वायवे
स्वः स्वाहा इदं सूर्याय त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासिसिष्ठ
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत्स्वाहा इदम
ग्नीवरुणाभ्यां सत्वन्नो अग्ने वमो भवोती नेदिष्ठोऽस्या उषसो व्युष्टौ अवयक्ष्व
नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा इदमग्नीवरुणाभ्यां
अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्वमित्वमयाऽअसि अयानो यज्ञं वहास्या
नो धेहि भेषजं स्वाहा इदमग्नये भेषजाय येते शतं वरुणं ये सहस्रं य
ज्ञियाः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुंचंतु मरु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दूर्वासिद्धार्थकाश्चैव अष्टांगो अर्घ उच्यते एवं शुद्धोदकमेव वा अर्घ्यविधा
य चरणप्रक्षालनार्थं उदकं पाद्यं चरणप्रक्षालनार्थं पात्रं च आचमना
र्थं शुद्धोदकपरिलिंपात्रं कांस्यपात्रे दधिमधुघृतानि कृत्वा द्वितीयेन कां
स्यपात्रेण पिधाय मधुपर्कं आसादयेत् अंचलग्रंथिबंधनाय वस्त्रं अंत
र्द्धानवस्त्रं च चतुर्विंशतितंतुभिर्व्याममात्रीं कुंकुमरंजितां वरमालां कृत्वा
ऽसादयेत् वरवरणसामग्रीं च दानप्रतिष्ठार्थं द्रव्यं इत्यादि सामग्रीं विधा
य यजमानः पत्नी च स्वासने उपविशेत् आचार्योपि स्वा॰ ततो यथास
माचारं हरिनीराजितो वरो मंडपमुपेत्य स्वासने आगत्य तिष्ठेत् अद्येह
त्यादि देशकालौ स्मृत्वा कन्यादानार्थं प्रजापतिरूपिणं वरं मधुपर्केण

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त् कन्यायाः करे मदनफलयुतं डोरकं बध्नीयात् वरपिता स्वगृहे मातृकाप्
जनं नांदीश्राद्धं च कृत्वा महयशं कुर्यात् वरस्य करे मदनफलयुतं डोरकं
बध्नीयात् कन्यादाता गोरूपेणार्ग्या वत्कन्यादानं क्रियते अथ मधुपर्कं साम ५३
ग्रीकुर्यात् प्रथमं कन्यादातुर्यजमानस्य उत्तराभिमुखोपवेशनार्थं आस
नं स्थापयेत् यजमानस्य दक्षिणभागे उत्तराभिमुखोपवेशनार्थं पत्न्याः
आसनं स्थापयेत् पूर्वाभिमुखोपवेशनार्थं वरस्यासनं तदभिमुखोपवे
शनार्थं कन्यासनं स्थापयेत् समाचारात् वस्त्रेणाछादयेत् तदुपरि कुंकुमे
न स्वस्तिकानि कुर्यात् ततो विष्टरद्वयं कर्तव्यं पंचविंशति दर्भैस्तु एको वि
ष्टरो भवति ततस्ताम्रपात्रे आपः क्षीरं कुशाग्राणि दधि चंदनमक्षताः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दोहोसमीतिप्रजापतिऋषिः यजुछंदः आपो॰ पादप्रक्षालनेग्रहणेविनियो
गः विराजोदोहोसिविराजोदोहमशीयममपिपाद्यायैविराजोदोहइति स्वंद
क्षिणंचरणंप्रक्षाल्या पुनर्विराजोदोहइति सव्यंपादंप्रक्षालयेत् क्षत्रि
यादयोवराः सव्यंपादंप्रक्षाल्यदक्षिणंपादंप्रक्षालयेयुः समाचारात् यज
मानोवरस्यपादप्रक्षालनंकुर्यात् ततोयजमानोद्वितीयंविष्टरंदद्यात् आ
चार्योवदेत् विष्टरोविष्टरोविष्टरः यजमानः प्रतिगृह्यतां वर॰ प्रतिगृह्णा
मितंविष्टरंतूष्णींप्रतिगृह्यवर्ष्मोस्मिसमानानामुद्यतामिवसूर्यः इमंतम
भितिष्ठामियोमाकश्चाभिदासति इतिविष्टरंपादयोरधःकृत्वाउपवि
शेत् ततोयजमानः अर्घ्यंवरायदद्यात् आचार्योवदेत् अर्घोअर्घोअर्घः ५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र्चयिष्ये इतिसंकल्प्यः ततोयजमानोवरं प्रतिब्रूयात् साधुभवानास्ताम
र्चयिष्यामोभवंत ततोवरः अर्चयइतिब्रूयात् यजमनोविष्टरं हस्तेगृ
हीत्वाआसीत आचार्यः विष्टरोविष्टरोविष्टरः इतिवदेत यजमानः प्रति
गृह्यतांइतिवदेत ततोवरः प्रतिगृह्णामिइत्युक्त्वा ततः श्रीप्रतिगृह्य ॐ वर्ष्मो
स्मीत्यस्याथर्वणऋषिः विष्टरोदेवतात्रिष्टुपछंदः उपवेशनेविनियोगः ॐ वर्ष्मो
स्मीसमानानामुद्यतामिवसूर्यः इमंतमभितिष्ठामियोमाकश्चाभिदासति
ति विष्टरंआसनेकृत्वा उपविशेत ततोयजमानः पाद्यंगृहीत्वा आचार्य
यजमानवराः क्रमेणब्रूयुः सर्वत्र आचार्योवदेत् पाद्यंपाद्यंपाद्यं यज
मानंप्रतिगृह्यतां वरः प्रतिगृह्णामि ततोवरस्तु श्री पाद्यंगृहीत्वा विराजो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रजानामधिपतिंप्रसूनामरिष्टंलन्नो इति आचमनंकुर्यात् द्विस्तूष्णीं ततोय
जमानोमधुपर्कंदद्यात् आचार्योवदेत् मधुपर्कोमधुपर्कोमधुपर्कः य
जमानः प्रतिगृह्यतां वरः प्रतिगृह्णामि ततोयजमानः करस्थंउद्घाटितं
मधुपर्कं मित्रस्यत्वेतिबृहस्पतिर्यजुः मधुपर्कोदेवता मधुपर्कावेक्षणेविनि
योगः मित्रस्यत्वाचक्षुषासर्वाणिभूतानिसमीक्षंतां मित्रस्याहंचक्षुषास
र्वाणिभूतानिसमीक्षे मित्रस्यचक्षुषासमीक्षामहे प्रतीक्षे इतिपश्येत् त
तोदेवस्यत्वेति बृहस्पतिरांगिरसः यजुः मधुपर्कोदेवता मधुपर्कग्रहणे०
ततोदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यां प्रतिगृह्णामि ६
इतिप्रतिगृह्य सव्येकरेकृत्वादक्षिणानामिकया नमस्यावेतिप्रजापति०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यजमानः प्रतिगृह्यतां वरः प्रतिगृह्णामि आपस्थेप्रजापतिः यजुः आपो ० अर्घग्रहणे विनियोगः ॐ आपस्थयुष्माभिः सर्वान्कामानवाप्नवानि इति प्रतिगृह्य अर्घं शिरसाभिवंद्य समुद्रं वरुणापर्वण अनुष्टुप् आपो देवता अर्घाभिमंत्रणे विनियोगः समुद्रंवः प्रहिणोमिस्वांयोनिमभिगच्छत अरि ष्टास्माकंवीरामापरासेचिमत्पयः इतिनिनयन् अभिमंत्रयेत् ईक्षेतइत्य र्घः ततोयजमानः आचमनीयजलंवरायदद्यात् आचार्योवदेत् आच मनीयमाचमनीयमाचमनीयं यजमानः प्रतिगृह्यतां वरः प्रतिगृह्णामि त्युक्त्वाप्रतिगृह्य आमागन्निति परमेष्ठीऋषिर्बृहती छंदः आपो देवता आचमने विनियोगः ॐ आमागन्यशसासंसृज वर्चसातंमाकुरुप्रियं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वोभमंत्रेणः ३ प्रतिमंत्रेण त्रिः प्राश्येद्वा अवशिष्टमुत्तरत॰ आसीनाय पुत्रा
यशिष्याय वा दद्यात् सर्वं वा स्वयं भक्षेत् अथवाप्सु संचरे प्राकूनिनयेत् त
तः आचम्य अद्भिरंगानि स्पर्शेत् वाङ्म आस्येस्तु इति मुखं नसोर्मे प्राणोऽ
स्तु नासिकाद्वयं युगपत् अक्ष्णोर्मे चक्षुरस्तु चक्षुर्युग्मं युगपत् कर्णयो
र्मे श्रोत्रमस्तु इति दक्षिणकर्णं पुनरनेन वामकर्णं बाह्वोर्मे बलमस्तु इति
दक्षिणं बाहुं पुनरनेन वामं बाहुं ऊर्वोर्मे ओजोऽस्तु ऊरुद्वयं युगपत् स्पृशे
त् अरिष्टानि मेंगानि तनूस्तन्वा मे सह इति हस्ताभ्यां शीर्षादिपादांतं स्पृशे
त् ततो यजमानः गौर्गौर्गौः उत्सृज्य तां वरं प्रतिब्रूयात् ततो वरः प्रत्याह मा ७
तारुद्राणामिति ब्रह्मा ऋ॰ त्रिष्टुप् गौर्देवता गोरभिमंत्रणे विनियोगः माता

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यजुः सविता देवता मधुपर्कालोडने वि० ॐ नमः श्यावास्यायान्नशने यत्त आ
विद्धं तत्ते निष्कृतामि इति आलोड्य अनामिकांगुष्ठेन तस्मात् किंचिद् गृहीत्वा
त्रःश्रो बहिर्निक्षिपेत् एवं पुनर्वारद्वयं आलोड्य निक्षिपेत् ततः अनामिकां
गुष्ठाभ्यां गृहीत्वा० ततो यन्मधुन इति कुत्स० जगती० मधुपर्को देवता० म
धुपर्कप्राशने वि० यन्मधुनो मधव्यं परमं रूपमन्नाद्यं तेनाहं मधुनो म
धव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानि इति प्राशयेत् ए
वं पुनर्वारद्वयं प्राशयेत् मधुवातात्र्यचेन मधुवाता ऋतायते मधुक्षर
न्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः २ २
मधुद्यौरस्तु नः पिता २ मधुमान्नो वनस्पतिर्मधुमान् अस्तु सूर्यः माध्वीर्गा
गी १

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तः एनांउत्तरीयंपरिधापयति वरः याअकृंतन्निति प्रजापतिः त्रिष्टुप्. वासो
देवता. उत्तरीयपरिधानेविनियोगः याअकृंतंनवयंयाअतन्वत याश्चदेवी
स्तंतूनभितोततंथ तास्त्वादेवीर्जरसेसंव्ययस्वायुष्मतीदंपरिधत्स्ववासः
अथाचार्यः परस्परं समंजेथामितिवदेत् ततोवधूवरौपरस्परौसमंजतःस
मंजंत्वित्याथर्वणः अनुष्टु. लिंगोक्तादे. परस्परंसंमुखीकरणेसमंजनेवि.
उंसमंजंतुविश्वेदेवाः समापोहृदयानिनौ संमातरिश्वासंधातासमुदेष्ट्री
दधातुनौ अनेनमंत्रेण वरस्यैवमंत्रपाठः अत्रावसरेसमाचारात् गोत्र
प्रवरोच्चारणंप्रथमंवरस्य पश्चात्कन्यायाः वारत्रयंकुर्यात् ततोवरवाच
नीकश्राद्धंयजमानःकुर्यात् प्रजापतिरूपिणेवराय पाद्यंपरिकल्पयामि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हृद्यानं दुहितावत्सनाऽऽस्वसाहित्यानामभृतस्यनाभिः प्रनुवोचं चिकितुषे
जनायमागामनागामदितिंवधिष्ट ममच अमुकशर्मणोवरस्य अमुष्यअ
मुकशर्म्मणः यजमानस्यपाप्माहत ओं३ मुत्सृजततृणान्यत्तु इतिपठेत्
अत्रावसरेपंचभूसंस्कारान्कृत्वा अग्निंस्थापयेत् ततः अलंकृतांकन्यां
आनीयवराभिमुखींपूर्वस्थापितेआसनेउपवेशयेत् अंतर्हीनपटंधारये
त् ततोवरः एनांवासःपरिधापयति जरांगच्छपरिधत्स्ववासोऽइतिप्रजापतिः॰ २४
त्रिष्टुप्॰ वासोदे॰ वस्त्रपरिधाने॰ जरांगच्छपरिधत्स्ववासोभवाकृष्टीना
मभिशस्तिपावाशतंजीवःशरदःसुवर्चारयिंचपुत्राननुसंव्ययस्वायुष्म
तीदंपरिधत्स्ववासइति समाचारात् पूर्वपरीधानमेववस्त्रंस्पृशेत् त

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कर्मणि निर्विघ्नमस्तु इति सत्तानिभवंतु ततोलग्नसमये यजमानः कन्याद
नं कुर्यात् अद्य श्रीब्रह्मणो द्वितीयपरार्द्धे॰ एवं देशेकालेच अथ मेऽपाद्यव
स्थात् कुलश्रीलसौभाग्य सामुद्रिकलक्षण लावण्यसावयवारोग्यां कांचन
कंकणकटिसूत्रभुजंगकेयूरांगदभूषितां यवनालिकेर परितताम्रामधुर
फलयुतां पुष्पमालाविराजितां मुद्रिकांजनकंकण गजदंतकुपिकां पुंगी
फलप्रवालकुंकुमश्रीखंडोपहारसमन्वितां प्रसादितवस्त्राश्री धूपास्तृतांज
लिपरितां मदनफलहस्तां त्रिमातृलभ्युदांदशपुरुषविख्यातां वेदशा।
स्त्रप्रमाण नित्यकर्मणे तुभ्यं यवह्वं बीप्रसारितमयागवटविस्तारेण एको
नरशतकुलउद्धारेण यथाशक्त्यालंकृतां अमुकनाम्नीकन्यांकन्याद ९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

आसनं प्रजापतिः पूजनंच॰ अन्नकुंडलमुद्रिकावासांसि उपवीतंच प्रजा
पतिरूपिणे वरायसंप्रददे यथार्हतं गंधवेगंधं वानस्पत्यादि पुष्पाणि
सूर्याणि कांसपात्राणि रौद्राणि ताम्रपात्राणि बार्हस्पत्यानि वासांसि प्र
जापत्यान्युपवीत आग्नेयाकुंडलमुद्रिका अस्यकन्यादानमधुपर्कं सि
ध्यर्थं प्रजापतिरूपिणे वरायतुभ्यमहंसंप्रददे वरवाचनीकमाहसांगता
सिध्यर्थं ब्राह्मणान्भोजयिष्ये दक्षिणामुरवासंचाहंसंप्रददे मधुपर्के
ण वरार्चनसांगतासिध्यर्थं प्रजापतिरूपिणे वरायगांसंप्रददे अधापूर्वोच्च
रित॰ वरस्यमधुपर्कार्चनविधौ वाचनीकमाद्विधौ च न्यूनमतिरिक्तं नस
र्वं ब्राह्मणानांवचनात् गणेशांबिकयोः प्रसादात्सर्वंपरिपूर्णमस्तु उत्तरे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मुत्सृजे इति संकल्प्य ततो वरः को दात् कस्मा० अग्नये त्वामह्यं इति पठेत् अ
त्रावसरे देशाचारात् सरजनैतांबूलरागं वधूवरयोः करे स्थापयेत् वधूव
रयोः कंठे वरमालां स्थापयेत् मंगलाचलग्रंथिबंधनं कुर्यात् ततः पुण्या
हवाचनं तिलकं आशीर्वादांश्च पठेत् एवं पित्रा दत्तां कन्यां प्रतिगृह्य वि
धिना आदाय तां करे गृहीत्वा निष्क्रामति वरः यदैषी त्याथर्वणः अनुष्टु०
ल्लिंगोक्ता० निष्क्रमणे विनियोगः यदैषि मनसा दूरं दिशोनु पवमानो वा हि
रण्यवर्णो वैकर्णः स त्वा मन्मनसं करोतु आसाविति वधूनाम ग्रहणे समा
चारात्तस्य एव वरः पठेत् निष्क्रमणप्रभृति उदकुंभं स्कंधे कृत्वा अग्ने २०
र्दक्षिणतः उत्तरतो वा कश्चित् वाग्यतः तिष्ठेत् आचार्यः वधूवरौ समी

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नोऽक्तलोकफलप्राप्त्यर्थं पूर्वापरानेकवंशोद्धारणार्थं अमुकगोत्रप्रवरो
अमुकनामाहं अमुकगोत्राय अमुकप्रवराय अमुकशर्मणे प्रजापति
स्वरूपिणे वराय भार्यात्वेन तुभ्यमहं संप्रददे कन्यायाः करं गृहीत्वा वरह
स्ते दद्यात् तदैव कन्यायाः जननी मम यापि दत्ता इति वदेत् ततो वरः स्वस्ति
प्रतिगृह्णामीति वदेत् तस्मिन् अवसरे कन्यादानसांगतासिद्ध्यर्थं अ
ग्निदेवतं हिरण्यं रुद्रदैवत्यां गां यमदैवत्यं अश्वं महिषीं रथं वृहस्पतिदे
वत्या निवासांसि इत्यादि प्रजापतिरूपिणे वरा तुभ्यमहं संप्रददे यत्किंचि
द्दैवं द्रव्यं परि कल्पितं तत्स्य संकल्पं कुर्यात् न्यूनातिरिक्त दोषपरिहारार्थं
कन्यादानसांगतासिद्ध्यर्थं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो भूयसीं दातुमह

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

द्विशोभितां चतुर्भिर्द्दिक्षुउपर्युपरिसुरं जितनानाभांडैः पंचसप्तनवसंख्याकैर्वि
दुःखेनान्वितां चतुर्दिक्षुनागपाशयुतां पूर्वमेवसुराचितां वेदिं वधूवरौ अभ्यु
पेयतां प्रमादात्सर्वमग्निस्थापनेन कृतं चेत्तदापंचभूसंस्कारान्कृत्वा वेदिमध्य
भागेस्थंडिले अग्निंस्थापयेत् वधूवरौ तमग्निंप्रदक्षिणीकृत्य अग्नेः पश्चा
त्स्थापितेतेजनीतृणविशेषासनं कटं वापीठासनं वादक्षिणचरणेनप्रहृत्य
उपविशेत् वरः वराद्दक्षिणभागे वधूउपवेशयेत् नीतोब्रह्मोपवेशनादिच
रुवर्ज्यं कुशकंडिकांकुर्यात् आसादनोत्तरं उपकल्पयेत् शमीपलाशमि
श्रांल्लाजाः अश्मवृन्हयः शूर्पं कुमार्याभ्रातादद्यात् इत्याद्युपकल्पयेत् पर्यु ११
क्षणान्तेब्रह्मान्वारब्धेस्रुवेणहोमः प्रजापतयेस्वाहा इदंप्र० इंद्रायस्वाहा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

क्षयति परं मपसार्यपरस्परं समीक्षेयां ततः परस्परं आवेक्षणं कुर्वीया
तां अथवरः अघोरचक्षुरित्यादीनां चतुर्णां प्रजापतिः आद्यचतुर्थयोस्त्रि
ष्टुप् द्वितीयतृतीययोरनुष्टुप् कुमारी देवता समीक्षणे विः ॐ अघोरचक्षु
रपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः वीरसूर्देवकामाः स्योनाः श
न्नो भव द्विपदे शं चतुष्पदे सोमः प्रथमो विविदे गंधर्वो विविद उत्तरः तृतीयो
ऽग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः सोमो ददद् गंधर्वाय गंधर्वो ददद् अग्नये र
यिं च पुत्रांश्चादाद् अग्निर्मह्यमथो इमां सा नः पूषा शिवतमामैरय सा न ऊरू उश
ती विहर यस्यामुशंतः प्रहराम शेपं यस्यामु कामा बहवो निविष्टै इति वरो
क्षयात् ततः वरस्य चतुर्हस्त परिमित चतुरस्रं नानालंकार वितानमंडपा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

इ.दमग्नि० अग्नयेस्वाहा इ.दं स० सोमायस्वाहा इ.दं सो० विवाहेयोजकनाम्ने
वैश्वानरायपृजनम् ततोभूराद्याः प्रजापतिवर्ज्जं अष्टाकृतयः भूः स्वाहा इ०
भुवः स्वाहा इ० स्वः स्वाहा इदं० त्वन्नः सत्वंनः अयाश्चाग्ने० येनेशतं उदुत्तमं०
मंत्रास्त्यागअश्वपूर्वमुक्ताः ततः आज्येनैवराष्ट्रभृद्धोमः ऋतषाडृतधामा
ग्निर्गंधर्वाः सनइदं ब्रह्मक्षत्रंपातुतस्मैस्वाहावाट् इदमृतषाडे ऋतधाम्ने
12 ग्नयेगंधर्वाय १ ऋतषाडृतधामाग्निर्गंधर्वस्तस्योषधयोप्सरसोमुदोना
मताभ्यः स्वाहा इदमोषधीभ्योप्सरोभ्योमुद्भ्यः २ संहितोविश्वसामासू
र्योगंधर्वः सनइदं ब्रह्मक्षत्रंपातुतस्मैस्वाहावाट् इदं संहितायविश्वसा
म्नेसूर्यायगंधर्वाय ३ संहितोविश्वसमासूर्योगंधर्वस्तस्यमरीचयोप्सर

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सआयुवोनामताभ्यःस्वाहा इदंमरीचिभ्योप्सरोभ्यआयुभ्यः ४ सुषुम्णःसूर्य
रश्मिश्चंद्रमागंधर्वःसनइदं॰स्वाहावाट् इदंसुषुम्णायसूर्यायरश्मयेचंद्र
मसेगंधर्वाय ५ सुषुम्णःसूर्यरश्मिश्चंद्रमागंधर्वस्तस्यनक्षत्राण्यप्सरसो
भेकुरयोनामताभ्यःस्वाहा इदंनक्षत्रेभ्योप्सरोभ्योभेकुरिभ्यः ६ इषिरोवि
श्वव्यचावातोगंधर्वःसनइदं॰स्वाहावाट् इदमिषिरायविश्वव्यचसेवाताय
गंधर्वाय ७ इषिरोविश्वव्यचावातोगंधर्वस्तस्यापोप्सरसऊर्जोनामताभ्यः
स्वाहा इदमद्भ्योप्सरोभ्यऊर्ग्भ्यः ८ भुज्युःसुपर्णोयज्ञोगंधर्वःसनइदंवाट्
इदंभुज्यवेसुपर्णाययज्ञायगंधर्वाय ९ भुज्युसुपर्णोयज्ञोगंधर्वस्तस्यद
क्षिणाप्सरसस्तावानामताभ्यःस्वाहा इदंदक्षिणाभ्योप्सरोभ्यस्तावाभ्यः १० ३२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रजापतिर्जयायानिंद्रायवृष्णेप्रायच्छदुग्रः पृतनाजयेषु तस्मैविशः समनमंत
सर्वाः सउग्रः सइहव्योबभूवस्वाहा इदं प्रजापतयेजयायानिंद्रायवृष्णे १३
अथाभ्यातानहोमः अभ्यातानानां प्रजापतिरृ० त्रिष्टुलिंगोक्तादेवताहोमे० ॐअ
ग्निर्भूतानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपु
रोधायामस्मिन्कर्मण्यस्यांदेवहूत्याᳪस्वाहा इदमग्नयेभूतानामधिपत
ये १ इंद्रोज्येष्ठानामधिपतिसमावत्वस्मिन्० देवहूत्याᳪस्वाहा इदमिंद्रा
यज्येष्ठानामधिपतये २ यमः पृथिव्यानामधिपतिसमा० देवहूत्याᳪ
स्वाहा इदंयमायपृथिव्या अधिपतये ३ उदकोपःस्पर्शनं वायुरंतरिक्ष
स्याधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधा १३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रजापतिर्विश्वकर्मामनोगंधर्वःसनइदं॰स्वाहावाट् इदंप्रजापतयेविश्वकर्म-
णेमनसेगंधर्वाय ११ प्रजापतिर्विश्वकर्मामनोगंधर्वस्तस्यऋक्सामान्यप्सरस
एष्टयोनामताभ्यःस्वाहा इदमृक्सामेभ्योप्सरोभ्यएष्टिभ्यः १२ अथजयाहोमः॥
जयानांपरमेष्ठी॰ऋ॰छंदः अंत्यस्यात्रिष्टुप्॰लिंगोक्तादेवताहोमेवि॰ॐचित्तं
चस्वाहा इदंचित्ताय १ चित्तिश्चस्वाहा इदंचित्त्यै २ आकूतंचस्वाहा इदंआ-
कूताय ३ आकूतिश्चस्वाहा इदमाकूत्यै ४ विज्ञातंचस्वाहा इदंविज्ञाताय ५
विज्ञातिश्चस्वाहा इदंविज्ञात्यै ६ मनश्चस्वाहा इदंमनसे ७ शक्करीश्चस्वा-
हा इदंशक्कर्यै ८ दर्शश्चस्वाहा इदंदर्शाय ९ पौर्णमासंचस्वाहा इदंपौ-
र्णमासाय १० बृहच्चस्वाहा इदंबृहते ११ रथंतरंचस्वाहा इदंरथंतराय १२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ऽःस्वाहा इदंसोमायउषधीनामधिपतये १२ सविताप्रसवानामधिपतिःसमा॰
हुत्यांऽःस्वाहा इदंसवित्रेप्रसवानामधिपतये १३ रुद्रःपशूनामधिपतिःसमा
॰हुत्यांऽःस्वाहा इदंरुद्रायपशूनामधिपतये १४ उदकोपःस्पर्शः त्वष्टारूपा
णामधिपतिःस॰हुत्यांऽःस्वाहा इदंत्वष्ट्रेरूपाणामधिपतये १५ विष्णुःपर्वता
नामधिपतिःसमो॰हुत्यांऽःस्वा इदं विष्णवेपर्वतानामामधिपतये १६ मरुतो
गणानामधिपतिस॰हुत्यांऽःस्वाहा इदं मरुद्भ्योगणानामधिपतिभ्यः १७
पितरःपितामहाःपरेवरेततास्ततामहाःइहमावन्तु॰हुत्यांऽःस्वाहा इदं
पितृभ्यःपितामहेभ्यस्ततेभ्यस्ततामहेभ्यः १८ उदकोपःस्पर्शः अग्निरेति १४
स्यादीनांचतुर्णांप्रजापतिः॰त्रिष्टुप्॰तत्राद्यानांत्रयाणामग्निर्वायुसूर्यस्यवैवस्व

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यामस्मिन्कर्मण्यस्यां देवहूत्याꣳ स्वाहा इदं वायवेंतरिक्षस्याधिपतये
४ सूर्यो दिवोधिपतिः स मा॰ हूत्याꣳ स्वाहा इदं सूर्याय दिवोधिपतये ५
चंद्रमा नक्षत्राणामधिपतिः स मा॰ हूत्याꣳ स्वाहा इदं चंद्रमसे नक्षत्रा
णामधिपतये ६ बृहस्पतिर्ब्रह्मणोधिपतिः स मा॰ हूत्याꣳ स्वाहा इदं बृहस्पत
ये ब्रह्मणोधिपतये ७ मित्रः सत्यानामधिपतिः स मा॰ त्याꣳ स्वाहा इदं मित्राय
सत्यानामधिपतये ८ वरुणोपामधिपतिः स॰ त्याꣳ स्वाहा इदं वरुणाया
पामधिपतये ९ समुद्रः स्रोत्यानामधिपतिः स॰ त्याꣳ स्वाहा इदं समुद्राय
स्रोत्यानामधिपतये १० अन्नꣳ साम्राज्यानामधिपतिस॰ हूत्याꣳ स्वाहा इद
मन्नाय साम्राज्यानामधिपतये ११ सोम ओषधीनामधिपतिः स मा॰ हूत्या

CC-0, Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नुपरेहि पंथांयस्ते अन्य इतरोदेवयानात् चक्षुष्मतेश्रृण्वतेतेब्रवीतिमानःप्र
जां रीरिषोमोतवीरान्स्वाहा इदं मृत्यवेभूमोत्यागः उदकोपस्पर्शनं अथ
लाजाहोमः समाचाराद् वधूवरयोः करविश्लेषंकृत्वानांतरागमन्यत्रस्था
पयेत् लाजाहोमकाले कुमार्याभ्रातासमाचारात् नागवल्लीदललाजाद्दतेकु
मार्याः अंजलौ शमीपत्रसंयुतान्लाजान्प्रक्षिपेत् अंजलिस्थानेव लाजान् वा
रत्रयंमंत्रेण तिष्ठतीकुमारीसह तेनांजलिनाजुहुयात् अर्य्यमणमित्यादी
नां त्रयाणामथर्वण ऋषिः अनुष्टुप्. तत्राद्यस्यार्यमान्त्ययोरग्निर्देवताहोमे
विनियोगः अर्यमणं देवंकन्या अग्निमयक्षत सनोअर्यमादेवःप्रेतोमुंचतु
मापतेःस्वाहा इद मर्यमणे इतिप्रथमं इदंनार्युपब्रूतेलाजानावपंतिका०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तोदेवताहोमे॰ अग्निरैतुप्रथमोदेवतानां॰ सोस्यैप्रजांमुंचतुमृत्युपाशात् तदयं॰ राजावरुणोनुमन्यतांयथेयं॰ स्त्रीपुत्रमघंन्नरोदात्स्वाहा इदमग्नये इमामग्निस्त्रायतांगार्हपत्यः प्रजामस्यैनयतुदीर्घमायुः अशून्योपस्थाजीवतामस्तुमातापौत्रमानंदमभिविबुध्यतामियं॰ स्वाहा इदमग्नये २ स्वस्तिनोअग्नेदिवापृथिव्याविश्वानिधेह्ययथायदत्र यदस्यांमहिदिविजातंप्रशस्तंतदस्मासुद्रविणंधेहिचित्रं॰ स्वाहा इदमग्नये ३ सुगन्नुपंथांप्रदिशन्नएहिज्योतिष्मध्येह्यजरन्नआयुः अपैतुमृत्युरमृतमआगाद्वैवस्वतोनोअभयंकृणोतुस्वाहा इदंमृत्यवेभ्रमोत्यागः ४ समाचाराद्ग्नेरंतर्हानपरंदध्यात् परंमृत्यावितिएक ऋचकसूपिःत्रिष्टुः मृत्युर्दे॰ होमेवि॰ परंमृत्योअ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हे बहून् नेसंतुजरदष्टयः संप्रियोरोचिष्णु सुमनस्यमानो पश्येम शरदः श
तंजीवेम शरदः शतं६ शृणुयाम शरदः शतं इति करं संगृह्य वधूं पुरस्कृत्य
अग्नेरुत्तरतः स्थापितमश्मानउपरि दक्षिणपादेन वधूं आरोहयेत् वरः आ
रोहेमेत्याथर्वणः अनुष्टु॰ वधूर्दे॰ अश्मारोहणे॰ ॐ आरोहेममश्मानमश्मे
व त्वं६ स्थिराभव अभितिष्ठपृतन्यतो वबाधस्व पृतनायत इति आरोहयेत्
15 अथ गाथां गायति वरः सरस्वतीति विश्वावसु॰ अनुसरस्वती दे॰ गाथागाने वि॰
ॐ सरस्वती प्रेदमिव सुभगे वाजिनीवति यां त्वा विश्वस्य भूतस्य प्रजयामस्या
ग्रतः यस्यां भूतं६ समभवद्यस्यां विश्वमिदं जगत् तामद्य गाथां गास्यामि १६
यास्त्रीणामुत्तमं यशः इति अथ वधूवरौ अग्नेः प्रदक्षिणं कुर्यातां अग्ने वधूः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

आयुष्मानस्तु मे पतिरे ॥ धं नां स्नानयो मम स्वाहा इदमग्नये इति द्वितीयं इमां
ल्लाजानावपाम्यग्नौ समृद्धिकरणं तव मम तुभ्यं च संवननं तदग्निरनुमन्यतामि
यं ॥ स्वाहा इदमग्नये इति तृतीयं अथ वध्वाः सांगुष्ठं दक्षिणं करं सन्नो वृत्व
रागं वरः स्वदक्षिणकरेण गृह्णीयात् गृभ्णामीत्यादीनां चतुर्णां याज्ञवल्क्य
भारद्वाजाथर्वणप्रजापतयः ऋषयः त्रयाणां त्रिष्टुबनुष्टुभश्छंदांसि च
तुर्थं यजुः भगाद्यादेवताः पाणिग्रहणे वि० ॐ गृभ्णामि ते सौभगत्वाय हस्तं म
१७ या पत्या जरदष्टिर्यथासः भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय दे
वाः अमोहमस्मि सा त्वं सा त्वमस्यमो अहं सामाहमस्मि ऋक्त्वं द्यौरहं पृथि
वी त्वं तावेहि विवहावहै सह रेतो दधावहै प्रजां प्रजनयावहै पुत्रान्विंदाव

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दमग्नयेस्विष्टकृते संस्रवप्राशनं पवित्राभ्यांमार्जनं पवित्रप्रतिपत्तिः वन्हौ
प्रक्षेपः प्रणीताविमोकः ब्रह्मणेपूर्णपात्रदानं अथसप्तपदीपरिक्रमणं स
माचारात् अक्षतपुंगीफल द्रव्यैः सप्तपुंजान् उदकुंसंस्थाप्यकृत्वावरः वध्वाः
दक्षिणपादंगृहीत्वापुंजोपरिक्रमेणन्यसेत् एकमिषेविष्णुस्त्वानयतु द्वे
ऊर्ज्जेविष्णु॰ त्रीणिरायस्पोषायविष्णु॰ चत्वारि मायोभवायविष्णु॰ पंचपशु
भ्योविष्णु॰ षड्ऋतुभ्योविष्णु॰ सखेसप्तपदाभवसामामनुव्रताभवविष्णु॰ ए
वंक्रमेणउदीचींसप्तपदानिपरिक्रामयेत् तस्मादुदकुंभात् उदकंगृही
त्वावधूंमूर्द्धि अभिषिंचतिवरः आपइतिप्रजापतिऋषिः सुप्रतिष्ठाः आपो
दे॰ अभिषेचनेवि॰ ॐ आपः शिवाः शिवतमाः शांताः शांततमास्तास्तेकृण्वं २७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तुभ्यमग्न इत्याथर्वणः अनु० अग्निर्देवता परिक्रमणे० तुभ्यमग्नेपर्यवहंस्त्स
र्यावहतुनासह पुनः पतिभ्योजायांदाग्नेप्रजयासहइति अग्नेपश्चिमतोय
थास्थाने आगत्य कुमार्याभ्रातादति लाजाहोमादिपरिक्रमणांतं पुनर्वार
द्वयंसर्वमपितथैवकुर्यात् ततोप्रदक्षिणोनंतरं वधूवरयोः कर विश्लेषं
कृत्वाशूर्पे उर्वरितान्लाजान् शूर्पकोणाग्रेलातितिष्टती वधूः चतुर्थवारं
जुहुयात् भगायस्वाहा इदंभगायततः करग्रहणमकृत्वैववरः अग्नेभ्र
त्वावधूवरौत्सीमेवाग्नेश्चतुर्थंप्रदक्षिणंप्रकुर्यातांततःसमाचारान् शा
लकंवस्त्रादिनातोषयित्वावधूवरौस्वासनेउपविशेतांततः अवशिष्टहो
मः प्रजापतयेस्वाहा इदंप्रजापतये आज्येनैव अग्नयेस्विष्टकृतेस्वाहा इ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नु॰ लिंगोक्ता दे॰ अभिमंत्रणे॰ वि॰ ॐ सुमंगलीरियं वधूरिमां॰ समेतपश्यत
सौभाग्यमस्यैदत्वायथास्तंविपरेतन ततःसमाचारात् वधूंवरस्यवामभा
गेउपविश्य पतिपुत्रवत्यश्चतस्त्रस्त्रियोवधूवरयोस्तिलकं कृत्वा वध्वाःदक्षि
णेकर्णेवदेयुः सौभाग्यवतीपुत्रवतीभव ततस्तांवधूंगृहीत्वा प्राग्वोदग्वा
नुगुप्तेगृहेरक्तवृषभस्यचर्मणि उपवेशयेत् वरः इहगावइतिप्रजाप॰ अनु
ष्टु॰ लिंगो॰ चर्मण्युपवेशने॰ इहगावोनिषीदंत्विहाश्वाइहपुरुषाः इहोस
हस्रदक्षिणोयज्ञइहपूषानिषीदतुइति समाचारात्तत्रैस्थएव तांअभि
मृश्यमंत्रंपठेत् विवाहेबहुवचनाद्द्वाप्तः देशकुलाचाराःप्रमाणत्वेनक
र्तव्यः आचार्यायवरंदद्यात् ब्राह्मणोवरश्चैत्तेनगोर्देया राज्ञाग्रामोदेयः १८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नुभेषजं आपोहिष्ठा॰ योवः शिव॰ तस्मा अरंगमा॰ अभिषेकं कृत्वा यदि दि
वा विवाहस्तदा अथैनां वधूं सूर्यमुदीक्षयति वरः सूर्यमुदीक्षस्व तच्चक्षुर्देव
हितं॰ शतान् इति सूर्यं पश्येत् रात्रौ विवाहस्तदा वधूं ध्रुवं दर्शयति ध्रुवम
सीति प्रजा॰ पङ्क्ति॰ ध्रुवो देवता॰ ध्रुवो दीक्षणे वि॰ ॐ ध्रुवमसि ध्रुवं त्वां पश्या
मि ध्रुवैधि पोष्ये मयि मह्यं त्वादात् बृहस्पतिर्मया पत्या प्रजावती शं जीव श
रदः शतात् वधूर्यदा स्वस्वरूपं ध्रुवं न पश्येत्तदापि प॰ अथ वरः स्वदक्षिणं ह
स्तं वध्वाः दक्षिणांसोपरि नीत्वा अधि हृदयं आलभते मम व्रते ते हृदयं द
धामि मम चित्तमनुचित्तं ते अस्तु मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नि
युनक्तु मह्यं अथैनां वधूं पश्यन् अभिमंत्रयेत् वरः सुमंगलीरिति प्रजा॰ अ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्वसंस्त्रवप्रक्षेपार्थं स्थापयेत् चरुश्रपणं कृत्वा समाचारात्सर्वपात्रार्थं चतु
रो ब्राह्मणान् वृणुयात् नैर्ऋत्याद्दिश्यनुवाक पुरुषसूक्त शिवसंकल्पमंडल
ब्राह्मणजपः कर्त्तव्यः पर्युक्षणांते प्रजापतये स्वाहा इदं प्र० इंद्राय स्वाहा
इदमिं० अग्नये स्वाहा इदमग्न० सोमाय स्वाहा इदं सो० चतुर्थीकर्मणि साक्ष
त्रि नाम्ने वैश्वानराय पृजनं आज्याहुतयः अग्नय इत्यादीनां पंचानां परमे
ष्ठी० त्रिष्टु० लिंगो० होमे० अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मण
स्त्वा नाथकाम उपधावामि यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा इदं वा
यवे सूर्य प्रायश्चित्ते त्वं देवानां० यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा
इदं सूर्याय चंद्र प्रायश्चित्ते त्वं देवानां० यास्यै गृहघ्नी तनूस्तामस्यै नाशय

पतिघ्नी तनूस्तामस्यै नाशय स्वाहा इदमग्नये वायो
प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम

19

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वैश्येनाश्वो देयः अनुक्तेनापि मुद्रेण धनं देयं ततस्त्रिरात्रं वधूवरयोः अ
क्षारलवणं मधुरं हविरेव प्राशनं भूमिशयनं च संवत्सरं द्वादशरात्रं
षड्रात्रं त्रिरात्रं वा यथासंभवं मैथुनं न कुर्यात् ततः समाचारात् कुलदेव
ता समीपं गत्वा गणेशांबिकाकुलदेवताश्च पूजयित्वा नमस्कारं कृत्वा म
धुरं भक्षयित्वा वरमालां वध्वाः कंठे रोपयेत् ततो वध्वा सह मंगलवाद्य
घोषेण स्वगृहमागच्छेद्वरः इति विवाहकर्म समाप्तं अथ चतुर्थीकर्मः
विवाहादूर्ध्वं चतुर्थरात्रेः अपरभागे द्वितीयेह्नि वा सद्यो वा कुर्यात् तत्र पं
चभूसंस्कारपूर्वकमग्निं स्थापयित्वा ब्रह्मोपवेशनादि चरुश्रपणपर्यन्तं कु
शकंडिकां कुर्यात् अग्नेरुत्तरतः एकं उदपात्रं पंचाज्याहुतीनं च वधूहुते

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एनां करोमि सजीर्यत्वं मया सह अमुकनाम्नी। ततः संस्रवप्राशनं पवित्रा
भ्यां मार्जनं पवित्रप्रति० प्रणीताविमोकः ब्रह्मणे पूर्णपात्रदानं इति क
र्मसमाप्य भाजने स्थालीपाकं उद्धृत्य एनां वधूं स्थालीपाकं प्राशयति
वरः भाजनात् घृतशर्कराज्यसमवेतं कवलमादाय वध्वा मुखे सकृद्दत्वा
प्राशयेत् प्राणैस्त इति प्रजापति० यजु० वधू देवता स्थालीपाकप्राशने
विनियोगः प्राणैस्ते प्राणान् संदधामि अस्थिभिरस्थीनि मांसैः मांसा
नि त्वचा त्वचं इति अत्र समाचारात् वधूवरौ चरुं सकृत्प्राशयेत् ततः प
श्चाद् दंपती यथेच्छमश्नीयातां इति व्यवहारः एवं विवाहं कृत्वा स्नुका
ले तामभिगच्छेत् उत: यथाकामं इति चतुर्थिकर्मसमाप्तिः वरस्य दक्षि २०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्वाहा इदं चंद्रमसे० गंधर्वप्रायश्चित्ते संदेवानां० यास्यै यशोघ्नी तनूस्तामस्यै
नाशयस्वाहा इदं गंधर्वाय अथ चरुस्थालीपाकहोमः प्रजापतय इति मे
धातिथिः अनुष्टु० प्रजापतिर्दे० होमे उँ प्रजापतयेस्वाहा इदं प्रजापतये
एतां आहुतीनां संस्रवमुदपात्रे निक्षिपेत् ततः स्विष्टकृत् अग्नयेस्वि
ष्टकृतेस्वाहा इदमग्नयेस्विष्टकृतये महाव्याहृतयः भूःस्वा० इ० भु
वःस्वा० इ० स्वःस्वाहा इ० त्वन्नः० सत्वन्नः० अयाश्चाग्ने० येतेशतं० उदुत्तमं
०प्रजापतयेस्वाहा इदं प्र० ततः स्थापितउदपात्रात् उदकमादाय एतांव
धूं मूर्द्ध्न्यभिषिंचेत् निवरः यामः इति प्रजापति० त्रिष्टु० वधूर्देवता वधूअभि
भिषेचने वि० उँ यातेपतिघ्नी प्रजाघ्नी पशुघ्नी यशोनिंदितातनूर्जारघ्नीतेन

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ोकन्या भविष्यति २

विष्टर २ पाद्य २ उपवीत २ पंचपात्र १ आचमनीय १ दधिमधुघृत २ व
स्त्र ग्रंथिबंधन १ वस्त्र अंबरपट १ ताम्रपात्र अर्घ १ वरमाला १ व्रीहि शमी
पत्र २ वंशपात्र १ हट्ट कलश १ पैशा कुंकुम नाडाछडी ॥ ॥ माघकृष्ण
१४ भौमवार संवत् १९१५ ॥ ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

णेकन्याकन्यायां दक्षिणेपितुः पितुश्चदक्षिणेचार्येरतत्कर्मविधीयते
कन्याप्रसन्नमुखीकुर्यात्पित्राचऊर्ध्वमुखः वरस्यपूर्वतोमातुः संप्रदाने
श्चयंविधिः २ इतिविवाहविधिः अथवेदीस्थानः वेद्यांवर्षाद्दौत्रयम
ग्निकोणेसिंहादिकेचत्वत्नये (?) नर्ऋत्यां अग्नित्रयेवायव्यदिशावृश्चिकघटत्र
येनैऋतस्थानमेतत् १ अभ्यंगेपतितेक्लीवेदशदोषविवर्जिते तुभ्यं
कन्यांप्रदास्यामिदेवाग्निगुरुसन्निधौ १ यावत्कन्यागुणोपेता सर्व
लक्षणसंयुता ददातिप्रतिगृह्णातिदेवाग्निगुरुसन्निधौ इतिदानः वा
चादत्तामयाकन्यावरार्थेसुकुलत्वयावराविलोकेनिश्चेनतस्मात्त्वंच
सुखीभवेत् १ भवद्द्रोहंसंप्रज्यमंडपायतनेममपुंगीफलप्रदानेनत्व

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham